# Skandaproktam Kailase Shankaralayavarnanam

# સ્કન્દપ્રોક્તં કૈલાસે શઙ્કરાલયવર્ણનમ્

## Document Information

Text title : Skandaproktam Kailase Shankaralayavarnanam

File name : skandaproktaMkailAseshankarAlayavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 4 munivAkyam | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં કૈલાસે શઙ્કરાલયવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)
- જૈગીષવ્યસ્કન્દસંવાદે -
સર્વલોકોપાકારાય કૈલાસે શઙ્કરાલયે ॥ ૧.૨॥

મણિસૌધસહસ્રાઢ્યે રત્નપ્રાકારવિસ્તૃતે ।
મણિમણ્ડપસાહસ્રૈર્નિચિતે ખચિતોપલે ॥ ૨॥

નવરત્નમણિજ્યોતિઃ પ્રભાકીલિતદિઙ્મુખે ।
વૈડૂર્યસૂત્રાન્તરગકાન્તિકાઞ્ચિતદિક્તટે ॥ ૩॥

હરિદ્ધરિમણીગર્ભસચ્છન્નામલભૂતલે ।
મણિગોપુરગોદ્ભાસિ કલશદ્યોતિતામ્બરે ॥ ૪॥

ચલત્પતાકાનિવહસંવહોદ્ભૂતવાતકે ।
સભાવિભાસિનટનકમ્પિતાખિલભૂતલે ॥ ૫॥

મણિધારા મહોદારા દૂરીકૃતતમસ્તતૌ ।
(મહોદારમણિજ્યોત્સ્ના દૂરીકૃતતમસ્તતૌ ।)
પ્રાકારગોપુરોત્તુઙ્ગગોપુઙ્ગવ વિરાજિતે ॥ ૬॥

મણિગર્ભશિવાગારસંશોભિસુમનોહરે ।
કૈલાસેશમહાલિઙ્ગતુઙ્ગધામોપશોભિતે ॥ ૭॥

પઞ્ચગઙ્ગાતટોદ્ભાસિલિઙ્ગપઙ્ક્તિ વિરાજિતે ।
તત્તીરસુમનોહારિ રત્નસોપાન સંયુતે ॥ ૮॥

અમ્બિકાશાલયોદ્દામ કુમ્ભદીધિતિદીપિતે ।
નન્દિકેશાદિગણપકૃતતૂર્યરવૈર્યુતે ॥ ૯॥

ગણેશસ્કન્દસદનસાનન્દગિરિમસ્તકે ।
દેવીશ્વરમહાધામધગદ્ધગિતદિક્તટે ॥ ૧૦॥

મહાગિરિવરોત્તુઙ્ગ રત્નસૌધવિરાજિતે ।
માણિક્ય ખચિતોદાર તારહીરવિરાજિતે ॥ ૧૧॥

ઇન્દ્રનીલમહાકાન્તિનીલકાલકિતામ્બરે ।
નન્દનાનન્દનશતસુચન્દનવનાવૃતે ॥ ૧૨॥

તમાલસાલવિપિનમધ્યપ્રાસાદશોભિતે ।
હરિન્મણિમહારમ્ભાચલત્પત્રશતાવૃતે ॥ ૧૩॥

રત્નતાલીવનોદ્દામ ઘર્ઘરાતુલમારુતે ।
મહાસરોવરોદ્ભાસિફુલ્લનીરજશોભિતે ॥ ૧૪॥

રત્નકલ્હારકુમુદશત્રપત્રવિરાજિતે ।
ચમ્પકાશોકકાદમ્બબિલ્વનાગવનાવૃતે ॥ ૧૫॥

ભ્રમદ્ભ્રમરતત્પુષ્પગુચ્છાચ્છાદિતમસ્તકે ।
નાનાપક્ષિયુતાપારરુતાનન્દિતકન્દરે ॥ ૧૬॥

મૃગમાતઙ્ગશરભસારઙ્ગમહિષાવૃતે ।
ચમરી સૃમરોદ્દણ્ડકોલકૂલૈશ્ચ શોભિતે ॥ ૧૭॥

મયૂરશુકજારાવપુંસ્કોકિલવિનાદિતે ।
સિંહર્ક્ષવૃકશાર્દૂલવનગોખડ્ગશોભિતે ॥ ૧૮॥

ગણવક્ત્રમહાતૂર્યદુન્દુભ્યાઘાતનાદિતે ।
મૃદઙ્ગશઙ્ખનિનદ સુનાદિતદિગન્તરે ॥ ૧૯॥

વીણાવેણુસ્વનાકીર્ણે મહાકૈલાસપર્વતે ।
પરિધાકારસંલગ્નપાદમૂલકસાગરે ॥ ૨૦॥

સુધાસાગરજોત્તુઙ્ગતરઙ્ગોત્થિતશેખરે ।
વાતપોતસમાનીતૈઃ પુષ્પરેણુસમન્વિતૈઃ ॥ ૨૧॥

તમાલવનસંલગ્નશીતવાતમનોહરે ।
મહાનીપવનીજન્યતત્સુમોબુદ્ધમારુતે ॥ ૨૨॥

શરત્કૌમોદકીફુલ્લ કુમુદામોદબન્ધુરે ।
ફુલ્લહલ્લકસંલ્લાસિવાતવાતાયનૈર્યુતે ॥ ૨૩॥

ગલત્ક્ષૌદ્ર મહાધારાદ્યાર્દ્રદ્રોણિભૂતલે ।
કેતકીધૂલિકાપાલી પાટલામોદવાયુભિઃ ॥ ૨૪॥

ઉદગ્રકુરવોદ્દામપિપ્પલીગન્ધમેદુરે ।
મહાગોપુરમધ્યસ્થમણિસિંહાસને શિવૌ ॥ ૨૫॥

ચિક્રીડતુસ્તતસ્તસ્મિન્મહાકૈલાસપર્વતે ।
કદાચિદ્ધીરફલકમઞ્ચમધ્યસ્થિતઃ શિવઃ ॥ ૨૬॥

દેવ્યાસ્તે સુમનોદ્દામભૂષણો ગિરિસાનુષુ ।
ક્વચિત્પ્રાસાદ મધ્યસ્થો વિહરત્યમ્બયા શિવઃ ॥ ૨૭॥

કદાચિત્સરસીમધ્યસૌધે મઞ્ચોત્તરે શિવઃ ।
ક્વચિત્સુધાફલોદ્દામ વનેષુ વિહરેદ્ધરઃ ॥ ૨૮॥

કદાચિદાન્દોલગતૌ મુમુદાતે શિવૌ મુને ।
હીરસારમહાસૌધે વીણાપાણ્યામ્બયા સહ ॥ ૨૯॥

તત્તન્ત્રીવક્ત્રસમ્બદ્ધરાગરક્તોઽમ્બયા યુતઃ ।
તપનોદ્દામકિરણસન્તપ્તાઙ્ગોઽભ્બયા શિવઃ ॥ ૩૦॥

ધારાસારગૃહે તુઙ્ગે વિહરત્યેવ શઙ્કરઃ ।
અચ્છાદર્શતલાચ્છિદ્રગૃહેષુ વિહરેદપિ ॥ ૩૧॥

ચન્દ્રચન્દનસંલિપ્તૌ શિવૌ વ્યહરતાં વને ।
કદાચિદાસ્થાનગતૌ નન્દિભૃઙ્ગ્યાદિભિઃ સહ ॥ ૩૨॥

મહાકૈલાસલિઙ્ગાનિ પ્રાસાદસ્થો નિરીક્ષ્ય તૌ ।
કૈલાસેશમહાલિઙ્ગે કરોત્યર્ચનમમ્બયા ॥ ૩૩॥

ક્વચિત્સભાસુ સન્ધ્યાયાં નૃત્યત્યાનન્દનિર્ભરઃ ।
ષડ્વક્ત્રં ગજવક્ત્રં ચ નિરીક્ષતિ મુહુર્મુહુઃ ॥ ૩૪॥

ચિ(સં)ક્રીડતોસ્તયોરેવં મહાકૈલાસપર્વતે ।
કસ્તસ્ય વર્ણયેદુક્ત્યા ચિત્રા લીલા મહેશિતુઃ ॥ ૩૫॥

- -

શમ્ભુઃ સુધાસાગરમધ્યગોઽમ્બાં
સમભ્યવર્ષત્કરયન્ત્રસેચનૈઃ ।
સા ચાલિસઙ્ઘૈઃ સ્વકરાગ્રસંસ્થ-
ધારાભિરાચ્છાદયદીશ્વરાર્કમ્ ॥ ૩૭॥

સિતાસિતસુપાટલીપટલકુન્દમન્દારજ
રજોદ્ધતમરન્દપભ્રમણશીતમન્દાનિલે ।
વસન્તસમયોલ્લસદ્વિજદિનાન્તસન્મલ્લિકા-
લતાગૃહનિકુઞ્જભૂપ્રથિતમઞ્ચતલ્પે શિવઃ ॥ ૩૮॥

મઞ્ચે સિઞ્ચતિ પુષ્પસારસલિલૈર્દેવ્યાસ્ત સન્મલ્લિકા-
સરભ્રમમધુવ્રતપ્રકટમોદધારાયુતમ્ ।
અનલ્પકુસુમોચ્ચયપ્રથયમાનતલ્પેઽમ્બિકા-
રિરંસયતિ કોકિલામધુરકાકલીનાં રવૈઃ ॥ ૩૯॥

પરિમલમિલદાલીફુલ્લમલ્લીકવલ્લી-
ચલદનિલકુલાયોડ્ડીનપત્રાણ્ડજૈશ્ચ ।
મધુરવરસુજાજીમુલ્લિ ધમ્મિલ્લભલ્લી-
કૃતસુમશરવલ્લીલીલયામાસ શમ્ભુઃ ॥ ૪૦॥

મલ્લીકુડ્મલજં નિચોલમચલાધીશાઙ્ગજાઙ્ગે હરઃ
પશ્યન્ તદ્વદનં મુદા પુરહરઃ સીમન્ત સીમાન્તકમ્ ।
નેત્રૈઃ સ્વૈરનિમેષકૈઃ પ્રતિદિનં સ્વીચક્ર ઈશો હરઃ ॥ ૪૧॥

તોષોન્મેષમિષેણ સા ત્રિભુવનાધીશં જુષત્તં હૃદા ।
પુષ્પાશેષવિશેષશોષિતગરં ભૂષાકૃતાહીશ્વરમ્ ॥ ૪૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં કૈલાસે શઙ્કરાલયવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૪ મુનિવાક્યમ્ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 4 munivAkyam . vAvRRittashlokAH ..

Notes:
Skanda સ્કન્દ describes (to Jaigīṣavya જૈગીષવ્ય) about the Splendor of the Abode of Śiva શિવ at Kailāsa કૈલાસ.

Proofread by Ruma Dewan

*Skandaproktam Kailase Shankaralayavarnanam*

pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*